NJESR/November-2025/Volume-7/Issue-11 E-ISSN-2582-5836
DOI-10.53571/NJESR.2025.7.11.8-14

# आनन्दवर्धनाचार्यविरचिते देवीशतके गुणविचारः

डा. सोमिना करः

**देवीशतककारस्य आनन्दवर्धनस्य परिचयः** – अलंकारशास्त्रजगति आलंकारिकशिरोमणिः आनन्दवर्धनाचार्यः एकं विशिष्टं स्थानम् अलंकरोति। वेदान्तशास्त्रे यथा शङ्कराचार्यस्य स्थानं, व्याकरणवाङ्मये यथा पाणिनिमहर्षेः स्थानं, अलङ्कारशास्त्रेऽपि आनन्दवर्धनाचार्यः स्वकीर्त्त्या तथैव स्थानमलंकरोति । संस्कृतसाहित्यजगति सः न तु केवलमेकः महान् कविः एकः आलङ्कारिकरपि आसीत् ।

**आनन्दवर्धनाचार्यस्य समयः** – आनन्दवर्धनस्य समयविषये कोऽपि स्पष्टसंकेतः अद्यावधि नोपलभ्यते । कल्हणविरचितस्य "राजतरङ्गिणी" ग्रन्थानुसारं ध्वन्यालोककारः आनन्दवर्धनाचार्यः कश्मीरप्रदेशस्य निवासी आसीत् । तस्य जन्म कश्मीरप्रदेशस्य राजानकवंशे तथा तस्य पितुः नाम आसीत् भट्टनोणः । तेन स्वयमेव ध्वन्यालोकस्य पाण्डुलिप्यां तृतीयोद्योतस्य परिशेषे नोणसूतः इति उल्लिखितम् । सः मातुः परमभक्तः आसीत् । अतः तस्याः स्तुत्याधारेण एकस्य काव्यस्य रचना भवेदिति एकदा देवी स्वयमेव आनन्दवर्धनस्य स्वप्ने आविर्भूय आदिष्टवती । एवमेव मात्रा आदिष्टः सन् आनन्दवर्धनाचार्येण देवीशतकस्य रचना कृता । यस्य उल्लेखः तेन देवीशतके एवं कृतः -

देव्या स्वप्नोद्गमादिष्टदेवीशतकसंज्ञया ।
देशितानुपमामाधादतो नोणसुतोनुतिम् ।।[१]

**देवीशतकस्य विषयवस्तु** - आनन्दवर्धनाचार्यः न तु केवलं साहित्यिकग्रन्थानां अपि तु बहूनां दार्शनिकग्रन्थानाञ्च रचयिता । देवीशतकं तस्य कृतिषु प्रमुखा रचना । शतककाव्येऽस्मिन् कविना चतुरधिकएकशतश्लोकानां समाहारे बहुविधानां चित्रबन्धानां प्रयोगेण भगवतीदुर्गायाः स्तुतिः विहिता । भक्तिरसात्मके स्तोत्रकाव्येऽस्मिन् मुरजबन्धः, गोमूत्रिकाबन्धः, सर्वतोऽभद्रः, महायमकं, काञ्चीयमकं, आवलियमकं, द्वक्षरः, अर्धभ्रमः, पुनरुक्तवदाभासः, अपशब्दाभासः, पादाभ्यासः, रेफविवर्जितः, प्रहेलिका, चतुरर्थः तथा श्लेषादिनां चित्रवन्धानाञ्च प्रयोगः परिदृश्यते । एतेषाम् अलङ्काराणाम् एवंविधप्रयोगः विविधालङ्काराणां प्रयोगे आनन्दवर्धनाचार्यस्य नैपुण्यं प्रदर्शयति । स्तोत्रकाव्येऽस्मिन् कविना आनन्दवर्धनाचार्येण करुणावरुणालयायाः देव्याः भवान्याः अकुपारकृपायाः वर्णना कृता । सृष्टि स्थिति तथा विलयकारिणी सैव देवी भक्त्या

सुलभा इति कविनोक्तम् । काव्येऽस्मिन् वंशस्थः, स्रग्धरा, उपजाति, अनुष्टुप्, शार्दूलविक्रीडितम्, आर्येत्यादिनां षण्णां छन्दसां, वैदर्भी, गौडी, पाञ्चाली इति रीतित्रयस्य तथा माधुर्यः, ओजः, प्रसादः इति गुणत्रयस्यापि सम्यक सन्निवेशः समुपलभ्यते । एतस्य गुणत्रयस्य लक्षणपर्यालोचनपुरस्सरं देवीशतकस्योदाहरणानि अत्र प्रस्तूयते ।

**आनन्दवर्धनाचार्यस्य मतेन गुणस्य स्वरूपं प्रयोजनञ्च -** ध्वन्यालोककारः आनन्दवर्धनः साहित्यशास्त्रे गुणविषयकं नवीनसिद्धान्तमाविष्कृतवान् । यद्यपि ध्वनिवादिनो गुणसंख्याविषये भामहमतमनुसरन्ति, परं गुणस्वरूपविषये तेऽलङ्कारवादिनां मतं निराकृत्य स्वमतं उपस्थापयन्ति । ध्वनिसिद्धान्तस्य प्रतिपादकः आनन्दवर्धनाचार्यः स्वकीयग्रन्थस्य ध्वन्यालोकस्य द्वितीयोद्यते गुणस्वरूपसम्बन्धे विशदा चर्चा कृता । यथा च तेनोक्तम् –

"तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः

अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्" ।।[२]

वृतौ तेन स्पष्टीकृतम् – "ये तमर्थं रसादिलक्षणमङ्गिनं सन्ततमवलम्बन्ते, ते गुणाः शौर्यादिवत् । वाच्यवाचकलक्षणान्यङ्गानि ये पुनराश्रिताः तेऽलङ्काराः मन्तव्याः कटकादिवत् ।" (ध्वन्यालोके २/३० वृतौ) आनन्दवर्धनात् पूर्वं भरतेन दण्डिना वामनेन च गुणाः काव्यस्य शब्दार्थयोर्वा धर्माः इति अङ्गीकृतम् । परन्तु आनन्दवर्धनः प्रथमतया गुणान् रसाश्रितधर्मान् रसस्यैव पोषकान् इव अङ्गीकृत्य नवीनसिद्धान्तमाविष्कृतवान् । यथा –

ये रसस्याङ्गिनो धर्माः शौर्यादयः इवात्मनः

उत्कर्षहेतवः ते स्युः अचलस्थितयो गुणाः ।।[३]

अर्थात् शूरतावीरतादयादाक्षिण्यादयो गुणाः यथा शरीरान्तर्भूते आत्मनि विद्यमानाः तमुत्कर्षयन्ति, तथैव माधुर्यः ओजः प्रसादप्राधान्येन अङ्गीभूते रसे विद्यमाना रससैवोत्कर्षं वर्धयन्ति । आनन्दवर्धनेन स्वपूर्ववर्त्याचार्याणां गुणविषयकं मतं न स्वीकृतम् । वामनाचार्यप्रतिपादिताः रीतेराश्रिताः गुणाः इत्यस्य स्थाने गुणाश्रिता संघटना (रीतिः) इत्युक्त्वा गुणानामत्यन्तं महत्त्वं स्वीकृतमानन्दवर्धनेन । इत्थमानन्दवर्धनः स्पष्टरूपेण रीतेराश्रयत्वं विच्छिद्य रीतेर्गुणाश्रयत्वं निरुपितवान् । गुणानां रसधर्मत्वं सर्वप्रथममेव आनन्दवर्धनेन स्वीकृतम् । ध्वनिवादिनामाचार्याणां गुणविषयकं विवेचनं तर्कसंगतं, सुसङ्गठितं सुस्पष्टञ्च विद्यते ।

**देवीशतके प्रयुक्ताः माधुर्यगुणव्यञ्जकाः श्लोकाः –** आनन्दवर्धनाचार्येण स्वकीये देवीशतके गुणानां वहुलप्रयोगः कृतः । स्तुतिकाव्येऽस्मिन् प्रसादगुणः पदे पदे शोभते । अनेन ज्ञायते यत् विशेषतः प्रसादगुणाधारेण कविना काव्यस्यास्य रचना

कृता । परन्तु मध्ये मध्ये माधुर्यस्य ओजसश्चापि चारुता काव्ये सम्यक् तया प्रतिभाति । आदौ काव्येऽस्मिन् माधुर्यगुणस्य चारुता अवलोक्यते । मधुरस्य भावः माधुर्यम्, आह्लादकत्वं तथा आनन्दस्वरूपम् ।

सम्भोगश्रृङ्गारे यावान् माधुर्यगुणः ततोऽपि अधिकतरः करुणे, ततोऽपि अधिकतरः विप्रलम्भे, ततोऽपि अधिकतरः शान्ते विद्यते । यतोहि काव्यप्रकाशे वर्णितमस्ति यत् –

आह्लादकत्वं माधुर्यं श्रृङ्गारे द्रुतिकारणम् ।

करुणे विप्रलम्भे तत् शान्ते चातिशयान्वितम् ।।[४]

अतः श्रृङ्गारादिरसानाम् आह्लादकत्वम् एव माधुर्यगुणः । एवमेव आनन्दवर्धनाचार्यः माधुर्यलक्षणं व्याहरन् श्रृङ्गार एव सर्वेषां रसानामपेक्षया अधिकाह्लादजनकत्वान्मधुरः इत्युच्यते । श्रृङ्गारान्वितं रसमयं काव्यमाश्रित्य माधुर्यगुणः प्रतिष्ठितः । तद्यथा –

"श्रृङ्गार एव मधुरः परः प्रह्लादनो रसः ।

तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ।।[५]

अतः प्रह्लादहेतुत्वात् श्रृङ्गार एव रसान्तरापेक्षया मधुरः ।

**माधुर्यगुणस्य व्यञ्जकवर्णाः –**

मूर्ध्नि वर्गान्त्यगाः स्पर्शाः अटवर्गा रणौ लघु ।

अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ।।[६]

अर्थात् टठडढवर्णरहिताः कादयो मान्ताः (कवर्गचवर्गतवर्गपवर्गाः) सर्वे वर्णाः ह्रस्वव्यवहितौ रेफणकारौ । स्पर्शवर्णाः (चरलवर्णाः) अल्पसमासा समासरहिता वा मधुररचनाः माधुर्यगुणव्यञ्जकाः भवन्ति । देवीशतके माधुर्यगुणपरिपूरिता श्लोकाः यथा -

ऋषीणां सादयामास या तमांसि त्रयीमयी ।

पायाद्वः सा दयामाधिच्छिदं जगति बिभ्रती ।।[७]

स्मरद्विषा या ययाचे यया चेयं विधेः क्रिया ।

या चाच्युतोऽपि तुष्टाव तुष्टा वः सास्तु पार्वती ।।[८]

अनेन प्रकारेण देवीशतकस्य १२, १७, २४, ४१, ७५, ८२, ८३, ८४, १०० इत्यादिषु श्लोकेषु माधुर्यगुणाः विराजन्ते ।

**देवीशतके ओजगुणव्यञ्जकाः श्लोकाः -** ओजगुणस्य स्वरूपं भवति चित्तस्य अतिविस्तृतिः । यथा चोक्तं ध्वनिकारेण –

रौद्रादयो रसाः दीप्त्या लक्ष्यन्ते काव्यवर्तिनः ।

तद्व्यक्तिहेतू शब्दार्थावाश्रित्योजो व्यवस्थितम् ।।[९]

अयं गुणः वीरे, बीभत्से रौद्रे च रसे अवतिष्ठते । क्रमशश्चोत्तरोत्तरमस्याऽतिशयो भवति । प्रसङ्गेऽस्मिन् साहित्यदर्पणकारेणोक्तं यत् –

"ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।

वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ।।"[१०]

अतः एव क्रमेण वीरे, बीभत्सरौद्ररसेषु ओजोगुणः उत्कर्षरूपेण विराजते ।

**ओजगुणस्य व्यञ्जकवर्णाः -** आचार्यमम्मटेन स्वस्य काव्यप्रकाशे उल्लिखितं यत् –

"योग आद्यतृतीयाभ्यामन्त्योः रेफतुल्ययोः ।

"तादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ।।[११]

अर्थात् वर्गाणां प्रथमतृतीयवर्णानां द्वितीयचतुर्थवर्णैः सह संयोगः (क – ग – च – ज – त – द – प – ब – वर्णानां ख – घ – छ – झ – थ – ध – फ – भ – वर्णैः सह संयोगः) तुल्यवर्णानां परस्परं संयोगः, टवर्गस्याऽऽद्याश्चत्वारो वर्णाः (ट – ठ – ड – ढ वर्णाः), श-षवर्णौ, वर्णानां रेफेण सह संयोगः, दीर्घसमासा उद्धृता च रचना ओजगुणाभिव्यञ्जकाः भवन्ति । देवीशतके ओजगुणस्य प्रयोगः यथा –

याश्रिता पावनतया यातनाच्छिदनीचया ।

याचनीया धिया मायायामायासं स्तुताश्रिया ।।[१२]

तमांसि ध्वंसमायान्ति यस्याः स्तुत्यादरेण वः ।

तस्याः सिद्धै धियां मातुः कल्पन्तां पादरेणवः ।।[१३]

अनेनप्रकारेण देवीशतकस्य १५, १६, १८, १९, २०, २१, २२, २३, २५, २६, २८, ३३, ३४, ३५, ३७, ३८, ३९, ४०, ४३, ४४, ४५, ४६, ५१, ५२, ५३, ५४, ५८, ५९, ६१, ६४, ६६, ७२, ७३, ७४, ७७, ७९, ८०, ८१, ८७, ८८, ९२, ९३, १०१, १०२, १०३ इत्यादयः श्लोकाः ओजगुणव्यञ्जकाः सन्ति ।

**देवीशतके प्रसादगुणमाश्रिताः श्लोकाः** – आनन्दवर्धनाचार्यस्य मतेन काव्यस्य सर्वेषु रसेषु सामान्यतया यत् समर्पकत्वं स एव प्रसादगुणः इत्यभिधीयते । यथा –

"समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति ।
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ।।"[१४]

शब्दार्थयोः स्वच्छता एव प्रसादः । सर्वरससाधारणो गुणः भवति प्रसादः । सर्वरचनासाधारणश्च अग्निर्यथा शुष्ककाष्ठे झटिति प्रसरति, जलं यथा स्वच्छवस्त्रं सहसा व्याप्नोति, तथैव स्वच्छतारूपो प्रसादः झटिति चित्तं व्याप्नोति । प्रसङ्गेऽस्मिन् काव्यप्रकाशे उल्लिखितं यत् –

"शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः ।
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्रविहितस्थितिः ।।"[१५]

विश्वनाथाचार्येणापि साहित्यदर्पणे प्रोक्तम् –

"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसादः समस्तेषु रसेषु रचनासु च ।।"[१६]

वीररौद्रादिरसेषु प्रयादाख्यो गुणः शुष्केन्धनाग्निवत् चित्तं व्याप्नोति, श्रृङ्गारकरुणादिषु स्वच्छवस्त्रे जलवत् प्रसादगुणः सहसा व्याप्नोति । सर्वत्र अस्य गुणस्य स्थितिः प्रदर्शिता ।

**प्रसादगुणस्याभिव्यञ्जकाः वर्णाः** – येन शब्देन, समासेन, रचनया वा श्रवणादनन्तरमेवार्थज्ञानं भवेत्, तेषु समासेषु रचनाषु च विद्यमानः सः शब्दः प्रसादो नाम गुण इति काव्यप्रकाशकारस्य आशयः । काव्यप्रकाशे उक्तं यथा –

"श्रुतिमात्रेण शब्दास्तु येनार्थप्रत्ययो भवेत् ।
साधारणः समग्राणां स प्रसादो गुणो मतः ।।"[१७]

साहित्यदर्पणे यथा – शब्दास्तद्व्यञ्जका अर्थवोधकाः श्रुतिमात्रतः । एवं माधुर्योजवत् प्रसादगुणस्य कश्चित विशेषो नियमो न विद्यते । देवीशतके प्रसादगुणाभिव्यञ्जकाः श्लोकाः यथा –

अनन्तमहिमव्याप्तविश्वां वेधा न वेद याम् ।
या च मातेव भजते प्रणते मानवे दयाम् ।।[१८]
नतापनीतक्लेशायाः सुरारिजनतापनी ।

न तापनी तनुर्यस्यास्तुल्या नादीनतापनी ।।[१९]

एवमेव देवीशतकस्य १०, ११, १४, २७, २९, ३०, ३१, ३२, ३६, ४२, ४७, ४८, ४९, ५०, ५५, ५६, ५७, ६०, ६२, ६३, ६५, ६७, ६८, ६९, ७०, ७१, ७८, ८५, ८६, ८९, ९०, ९१, ९४, ९५, ९६, ९७, ९८, ९९, १०४ इत्यादिषु श्लोकेषु प्रसादगुणाः विराजन्ते । अनेन प्रकारेण आनन्दवर्धनेन स्वकीये ग्रन्थे देवीशतके गुणानां प्रयोगः कृतः ।

## सन्दर्भविवरणानि

१. देवीशतकम्, १०१ (काव्यमाला भाग – ९)

२. ध्वन्यालोकः, तृतीयोद्यतः, भावप्रकाशिकाटीका, पृ. ३६९

३. तत्रैव, द्वितीयोद्यतः, दीधितिटीका, पृ. १२१

४. काव्यप्रकाशः, ८/६८.

५. ध्वन्यालोकः, २/७.

६. काव्यप्रकाशः, ८/७४.

७. देवीशतकम्, ६.

८. तत्रैव, ७.

९. ध्वन्यालोकः, २/९

१०. साहित्यदर्पणः, ८/४.

११. काव्यप्रकाशः, ८/७५.

१२. देवीशतकम्, ४.

१३. तत्रैव, ५.

१४. ध्वन्यालोकः, २/३३

१५. काव्यप्रकाशः, ८/७०.

१६. साहित्यदर्पणः, लक्ष्मीटीका, पृ. सं. ५८५.

१७. काव्यप्रकाशः, ८/७६.

१८. देवीशतकम्, १.

१९. तत्रैव, २.

## सहायकग्रन्थसूचिका


१. काव्यमाला, नवमोगुच्छकः, चौखम्भा भारती अकादमी, वाराणसी ।

२. द्विवेदी शिवप्रसाद, ध्वन्यालोकः, चौखम्बा सुरभारती प्रकाशन, वाराणसी ।

३. गुप्ता पुष्पा, संस्कृतसाहित्य का बृहद् इतिहास, ईस्टर्न बुक् लिंकर्स, दिल्ली ।

४. उपाध्याय बलदेव, संस्कृत साहित्य का इतिहास, ५ वी, कस्तुरबा नगर, सिगरा, वाराणसी सं २००१ ।

५. शर्मा श्रीबद्रीनाथ, ध्वन्यालोकः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, सं. षष्ठ, सन् २००६ ।

६. शास्त्री कृष्णमोहन, साहित्यदर्पणः, चौखम्भा संस्कृत संस्थान, वाराणसी, सं. वि. सं २०७९, सन् २०२२ ।

७. द्विवेदी शिवप्रसाद, अग्निपुराणम्, व्रजजीवन प्राच्यभारती ग्रन्थमाला १०६. चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली ।

८. Bhattacharya Bishnupada, Dhvanyāloka of Ānandavardhana, Uddyota – 1, Firma KLM Private Limited, Calcutta; 1981.

९. उपाध्यायः श्रीशिवजी, श्रीमम्मटाचार्यविरचितः काव्यप्रकाशः, सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, सरस्वतीभवन – ग्रन्थमाला, भाग – १४३, वाराणसी, २००२ ।